
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 14/03/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 14/03/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 30/08/2012 | **I Proof Reading & Correction** | **By B S Pavan & H K Srinivasa Rao** |
| 4 | 28/08/2013 | **Published** | **H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ सन्न्यासपद्धतिः ॥

नत्वा नारायणं देवं पूर्णं ब्रह्माक्षरोदितम् ।
यतेराचरणं वक्ष्ये पूर्णं शास्त्रानुसारतः ॥ 01 ॥

अरुणोदयवेलायामुत्थाय हरिमानसः ।
शौचादिकं यथान्यायं कृत्वा दन्तांश्च शोधयेत् ॥ 02 ॥

कटिशौचं मृदा कुर्यात् स्नानार्थं जलसंस्थितः ।
स्नानं कुर्याद्यथोक्तेन विधिना नियतो यतिः ॥ 03 ॥

धृतोर्ध्वपुण्ड्रम् विधिवत् प्रकल्प्यासनमच्युते ।
मनो निवेश्याष्टमन्त्रान् यथाशक्ति जपेच्छुचिः ॥ 04 ॥

द्वादशसहस्रा वृत्ति परं ब्रह्माक्षरं जपेत् ।
दण्डोदकं जपस्यान्ते दद्याद्विधिविधानतः ॥ 05 ॥

देवतां परमां सम्यक् पूजयेच्च विधानतः ।
भिक्षकाले विधानेन चरेद्भिक्षाटनं यतिः ।
एकत्र भिक्षाचरणं जघन्यमिति चोच्यते ॥ 06 ॥

अनेकेभिक्षाचरणं मुख्यधर्मो यतेर्युतः ।
त्रिसप्तपञ्चषष्ठं वा निर्गच्छेन ततोऽधिकम् ॥ 07 ॥

भिक्षाग्रहणकाले तु गृह्णीयाद्पात्रतो जलम् ।
भिक्षान्ने तु जलं प्रोक्ष पुनर्ग्राह्यं विदा जलम् ॥ 08 ॥

निवेदयेत् तदन्नं तु वारिजस्थोदकेनु तु ।
प्रोक्ष्य देवाय महते मूलमन्त्रेण वाग्यतः ॥ 09 ॥

तदन्नं भक्षयेत् स्वस्थो ह्यजवद्धरिमानसः ।
त्रिवारमुदकस्नानं यतेः शास्त्रेषु चोदितम् ॥ 10 ॥

अशक्तस्य यतेः शास्त्रे द्विवारं स्नानचोदना ।
अत्यन्ताशक्तविषये त्वेकं स्नानं स्मृतं बुधैः ॥ 11 ॥

वेदान्तशास्त्राभ्यसनं मुख्यधर्मो यतेः स्मृतः ।
ध्यायेन्नारायणं देवं सृष्टिस्थित्यन्तकारकम् ।
भक्तानां मुक्तिदं नित्यमन्यथाज्ञानिनां तमः ॥ 12 ॥

पूर्णप्रज्ञेन मुनिना व्यासवाक्यसमुद्धृतिः ।
न्यासधर्मस्य विषये शुभा सङ्क्षेपतः कृता ॥ 13 ॥

॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचित सन्यापद्धति॥

॥ श्री कृष्णार्पणमस्तु ॥
॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥
॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥